मनौ । ४ । १७२ । श्लोकस्य टीकायां कुल्लूकभट्टः । "यथा भूमिरुप्तबीजमात्रा तदैव प्रचुरपचेलिमफलव्रीहिस्तवकसम्वलिता न भवति ॥")

पचेलुकः पुं, ( पचत्योदनादीन् । पचो बाहुलकादेलुकः । ) सूदः । पाचकः । इति त्रिकाण्डशेषः ॥

पच्छः, [ स् ] व्य, ( वीप्सार्थे पादं पादमिति पद्भावः ततः शस् । ) पादं पादम् । इति संक्षिप्तसारव्याकरणम् ॥

पच्यमानः, त्रि, ( पच्यतेऽसौ इति । पच् + कर्म्मणि शानच् । ) वर्त्तमानपचनकर्म्मताश्रयः । वर्त्तमानपाकविशिष्टतण्डुलादि । इति व्याकरणम् ॥

पज, ङ रोधे । इति कविकल्पद्रुमः ॥ ( भ्वां-परं-सकं-सेट्-इदित् । ) रोध आवरणम् । पञ्जरः । सौत्रधातुरयम् । इति दुर्गादासः ॥

पज्जः, पुं, ( पद्भ्यां जातः । पद् + जन् + कर्त्तरि डः । ) शूद्रः । इति हेमचन्द्रः ॥ ( शूद्रस्य पद्जातत्वमुक्तं श्रुतौ यथा,—

"ब्राह्मणोऽस्य मुखमासीत् बाहू राजन्यः कृतः ।
ऊरू तदस्य यत् वैश्यः पद्भ्यां शूद्रो अजायत ॥")

पज्झटिका, स्त्री, छन्दोविशेषः । तल्लक्षणं यथा,

"प्रतिपदयमकितषोडशमात्रा
नवमगुरुत्वविभूषितगात्रा ।
पज्झटिका पुनरत्र विवेकः
क्वापि न मध्यगुरुर्गण एकः ॥"

उदाहरणं यथा,—

"तरलवतंसाश्लिष्टस्कन्ध-
स्खलतरपज्झटिकाकटिबन्धः ।
मौलिचपलशिखिचन्द्रकवृन्दः
कालियशिरसि ननर्त्त मुकुन्दः ॥"

इति छन्दोमञ्जर्य्यां मात्रावृत्ताख्यः ५ स्तवकः ॥ (तथा च भगवच्छङ्कराचार्य्यकृतमोहमुद्गरे ४ ।

"मा कुरु धनजनयौवनगर्व्वम्
हरति निमेषात् कालः सर्व्वम् ।
मायामयमिदमखिलं हित्वा
ब्रह्मपदं प्रविशाशु विदित्वा ॥"*॥)

मुद्गघटिका । इति छन्दोमञ्जरीटीका ॥

पञ्च, [ न् ] त्रि, संख्याविशेषः । पाँच इति भाषा । बहुवचनान्तोऽयम् । इत्युणादिकोषः ॥ ( यथा, मनुः । ११ । १६५ ।

"पुष्पमूलफलानाञ्च पञ्चगव्यं विशोधनम् ॥")

तज्ज्ञापकानि यथा । पाण्डवः १ शिवास्यम् २ इन्द्रियम् ३ स्वर्गः ४ व्रताग्निः ५ महापापम् ६ महाभूतम् ७ महाकाव्यम् ८ महामखः ९ पुराणलक्षणम् १० अङ्गम् ११ प्राणाः १२ वर्गः १३ इन्द्रियार्थः १४ वाणः १५ । इति कविकल्पलता ॥ पञ्चसंख्याविशिष्टे, त्रि । यदुक्तम् । "संख्या संख्येये ह्यादश त्रिषु ।" इत्यमरः । २ । ९ । ८३ ॥

पञ्चकं, त्रि, ( पञ्चैव इति स्वार्थे कन् । ) पञ्च । यथा, भाषापरिच्छेदे । ३३ । "संख्यादिपञ्चकं कालदिशोः शब्दस्य ते च खे ।" इति ॥ ( पञ्च संख्यापरिमाणमस्य । "तदस्य परिमाणम् ।" ५ । १ । ५७ । इत्यनुवृत्तौ "संख्यायाः संज्ञा संघसूत्राध्ययनेषु ।" ५ । १ । ५८ । इति पञ्चसङ्ख्यापरिमिति संघार्थे कन् प्रत्ययः । धनिष्ठादि पञ्चनक्षत्रम् । यथाह चिन्तामणिः ।

"अग्निचौरभयं रोगो राजपीड़ा धनक्षतिः ।
संग्रहे तृणकाष्ठानां कृते वस्वादिपञ्चके ॥"

पञ्चभिः क्रीतम् । "संख्याया अतिशदन्तायाः कन् ।" ५ । १ । २२ । इति कन् । पञ्चभिः क्रीते द्रव्यविशेषे ॥ )

पञ्चकपालः, पुं, पञ्चसु कपालेषु संस्कृतः पुरोडाशः । ( "संस्कृतं भक्षाः ।"४।२।१६ । इत्यण् ततो "द्विगोर्लुगनपत्ये ।" ४ । १ । ८८ । इत्यणो लुक् । ) स तु यज्ञविशेषः । यथा । "परा वा एष यज्ञं पशून् वपति योऽग्निमुद्वासयते पञ्चकपालः पुरोडाशो भवति ।"इत्यादि यजुर्वेदीयश्रुतिः ॥ ( पञ्चानां कपालानां समाहारः । परनिपातः । ) कपालपञ्चके, क्ली ॥

पञ्चकर्म्म, [ न् ] क्ली, ( पञ्चानां कर्म्मणां समाहारः ।) पञ्चप्रकारशारीरिकचिकित्साविशेषः । यथा,—

"वमनं रेचनं नस्यं निरूहश्चानुवासनम् ।
पञ्चकर्म्मेदमन्यच्च कर उत्क्षेपणादिकम् ॥"

इति शब्दचन्द्रिका ॥ ( भाषापरिच्छेदोक्तानि पञ्चकर्म्माणि । यथा, तत्रैव ६ ।

"उत्क्षेपणं ततोऽवक्षेपणमाकुञ्चनं तथा ।
प्रसारणञ्च गमनं कर्म्माण्येतानि पञ्च च ॥" )

पञ्चकषायः, पुं, ( पञ्चविधः कषायः । अथवा पञ्चानां वृक्षाणां कषायः वल्कलरसः । क्वचित्त्वयं बहुवचनान्तोऽपि दृश्यते । तत्र तु पञ्च च ते कषायाश्चेति एवमेव । ) महास्थानीयपञ्चप्रकारकषायद्रव्यम् । यथा,—

"जम्बुशाल्मलिवाट्यालं वकुलं वदरं तथा ।
कषायाः पञ्च विज्ञेया देव्याः प्रीतिकराः शुभाः ॥"

इति दुर्गोत्सवपद्धतिः ॥

पञ्चकृत्यः, पुं, ( पञ्च विस्तृतं कृत्यं शाखापल्लवादिकं यत्र ।) पक्तपौड़वृक्षः । इति राजनिर्घण्टः ॥ (क्ली, पञ्च प्रपञ्चितं कृत्यं कार्य्यं सृष्ट्यादिकम् । सृष्टिस्थितिध्वंसविधानानुग्रहात्मकं कार्य्यम् इति भावः । यथाह चिन्तामणिः ।

"यस्मिन् सृष्टिस्थितिध्वंसविधानानुग्रहात्मकम् ।
कृत्यं पञ्चविधं शश्वद्भासते तं नुमः शिवम् ॥" )

पञ्चकोलं, क्ली, पाचनविशेषः । यथा,—

"पञ्चकोलं कणामूलं कणाचव्याग्निनागरैः ।"

इति शब्दचन्द्रिका ॥ अस्य गुणाः ।

"पञ्चकोलं रसे पाके कटुकं रुचिकृन्मतम् ।
तीक्ष्णोष्णं पाचनं श्रेष्ठं दीपनं कफवातनुत् ।
गुल्मप्लीहोदरानाहशूलघ्नं पित्तकोपनम् ॥"

इति भावप्रकाशः ॥ अपि च ।

"पिप्पली पिप्पलीमूलं चव्यचित्रकनागरम् ।
दीपनीयः स्मृतो वर्गः कफानिलगदापहः ॥"

इति चक्रपाणिदत्तः ॥ ( पञ्चकोलघृतमुक्तं चरके चिकित्सितस्थाने १८ अध्याये ।

"पिप्पलीपिप्पलीमूलचव्यचित्रकनागरैः ।
सक्षारैरर्द्धपलिकैर्द्विः प्रस्थं सर्पिषः पचेत् ॥
कल्कैर्द्विपञ्चमूलस्य तुलार्द्धस्य रसेन च ।
दधिमण्डातकोपेतं तत्सर्पिर्जठरापहम् ।
श्वयथुं वातविष्टम्भं गुल्मार्शांसि च नाशयेत् ॥")

पञ्चकोषाः, पुं, ( पञ्च च ते कोषाश्चेति । ) कोषा इवात्माच्छादकत्वेन कोषाः । ते च पञ्चविधाः । यथा । अन्नविकारत्वात् स्थूलशरीरं अन्नमयकोषः १ ॥ पञ्चकर्म्मेन्द्रियसहितप्राणपञ्चकं प्राणमयकोषः २ ॥ पञ्चज्ञानेन्द्रियसहितं मनः मनोमयकोषः ३ ॥ पञ्चज्ञानेन्द्रियसहिता बुद्धिः विज्ञानमयकोषः ४ ॥ अहङ्कारात्मकोऽविद्यात्मको वा आनन्दमयकोषः ५ ॥ इति शिवगीतामतम् ॥ * ॥ अपि च ।

"पितृभुक्तान्नजाद्वीर्य्याज्जातोऽन्नेनैव वर्द्धते ।
देहः सोऽन्नमयो नात्मा प्राक् चोर्द्ध्वं तदभावतः ॥"

इत्यन्नमयकोषः १ ॥

"पूर्णो देहे बलं यच्छन्नक्षाणां यः प्रवर्त्तकः ।
वायुः प्राणमयो नासावात्मा चैतन्यवर्ज्जनात् ॥"

इति प्राणमयकोषः २ ॥

"अहन्तां ममतां देहे गृहादौ च करोति यः ।
कामाद्यवस्थया भ्रान्तो नासावात्मा मनोमयः ॥"

इति मनोमयकोषः ३ ॥

"लीना सुप्तौ वपुर्बोधे व्याप्नुयादानखाग्रगा ।
चिच्छायोपेतधीर्नात्मा विज्ञानमयशब्दभाक् ॥"

इति विज्ञानमयकोषः ४ ॥

"काचिदन्तर्मुखावृत्तिरानन्दप्रतिविम्बभाक् ।
पुण्यभोगे भोगशान्तौ निद्रारूपेण लीयते ॥
कादाचित्कत्वतो नात्मा स्यादानन्दमयोऽप्ययम्॥"

इत्यानन्दमयकोषः ५ ॥ इति पञ्चदशी ॥

पञ्चक्षारगणः, पुं, ( पञ्चानां क्षाराणां गणः । ) क्षारपञ्चकम् । पञ्चलवणम् । यथा,—

"क्षारैस्तु पञ्चभिः प्रोक्तः पञ्चक्षाराभिधो गणः ।
काचसैन्धवसामुद्रविट्सौवर्च्चलकैः समैः ॥
स्यात् पञ्चलवणं तच्च रुक्षोपेतं षड़ाह्वयम् ॥"

इति राजनिर्घण्टः ॥

पञ्चखट्वं, क्ली स्त्री, (पञ्चानां खट्वानां समाहारः ।) पञ्चखट्वाः समाहृताः । इति व्याकरणम् ॥

पञ्चगणयोगः, पुं, ( पञ्चानां गणो यत्र स एव योगः । ) विदारी गन्धा वृहती पृश्निपर्णी निदिग्धिका श्वदंष्ट्रा एता मिलिताः । इति राजनिर्घण्टः ॥

पञ्चगवं, क्ली स्त्री, पञ्चानां गवां समाहारः ॥ ( समासे टच् । ) पञ्चगावः समाहृताः । इति व्याकरणम् ॥

पञ्चगवधनः, त्रि, पञ्च गावो धनं यस्य । इति मुग्धबोधव्याकरणम् ॥

पञ्चगव्यं, क्ली, ( गोविकारः गव्यम् । पञ्चगुणितं गव्यम् । ) गोसम्बन्धिपञ्चप्रकारद्रव्यम् । ( यथा, मनुः । ११ । १६५ ।

"भक्ष्यभोज्यापहरणे यानशय्यासनस्य च ।
पुष्पमूलफलानाञ्च पञ्चगव्यं विशोधनम् ॥" )